# Manjushri Stotram

# मञ्जुश्रीस्तोत्रम्

## Document Information

Text title : Manjushri Stotram

File name : manjushrIstotram.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# मञ्जुश्रीस्तोत्रम्

श्रीमञ्जुनाथकमलासनरत्नमौलिर्विद्याधिपो भुवनमण्डलचक्रवर्ती ।
ध्यानाधिपोचितविराजितसौम्यरूपो वन्दामहे सुरनरासुरवन्दितार्यम् ॥ १॥

बालाकृतिः कुवलयोज्ज्वललोलहस्तः केयूरहारमणिकुण्डलघृष्टगण्डः ।
खादंश्च षोडशरदं सुकुमाररूपं वन्दामहे सुरवरार्चितमञ्जुघोषम् ॥ २॥

रोमाग्रकूपविवरे परिवर्तमानं विश्वप्रपञ्चकरणं सुगतात्मजस्य ।
त्रैविद्यमन्त्र तव नाथ गुणार्णवेण सूक्ष्माय बुद्धतनयाय नमोऽस्तु तस्मै ॥ ३॥

गम्भीरधर्मनयमार्गसुखप्रतिष्ठं ज्ञानोदधिं निखिलसत्त्वकृतार्थकारम् ।
प्रज्ञानिधानगुणसागरमप्रमेयं मञ्जुश्रियं जिनसुतं सततं नमामि ॥ ४॥

विदितसकलतत्त्वः क्षिप्तसन्तापसत्त्वस्त्रिभुवन उपकारी सर्वदुःखापहारी ।
मदनमथनवीरश्चारुरूपः सुचीरस्त्रिभुवनजनतोषः पातु मां मञ्जुघोषः ॥ ५॥

बालेन्दुरुचिराभासं वराभरणभूषितम् ।
प्रज्ञाब्जामलपत्राक्षं वन्दे मञ्जुश्रियं सदा ॥ ६॥

पात्रं वामकरे यस्य भ्रमन्नञ्जलिसन्निभम् ।
नाम्ना ते सर्वतो लक्ष्मीर्मञ्जुघोषं नमाम्यहम् ॥ ७॥

खड्गपुस्तकहस्ताय चन्द्रमण्डलवर्तिने ।
अज्ञानध्वान्तसूर्याय मञ्जुघोषाय ते नमः ॥ ८॥

ज्ञानोत्तरप्रभाकेतुं प्रणिधानमतिं तथा ।
शान्तेन्द्रियं मञ्जुघोषं भक्तितः प्रणमाम्यहम् ॥ ९॥

इति श्री मञ्जुश्रीस्तवस्तोत्रं सम्पूर्णम् ॥

*Manjushri Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*